नीदिकुभादि धो॥ सार्प्याद्ये बुधे हस्तान्मैत्रमादेवमं त्रिणि वैश्वदेवा द्गुरुते वारुणाद्भास्करात्मजेति अथानं
दादि पुष्ये दुष्ट योगास्तेषां कियतां मत्यावश्यकत्वे परिहारं शालिन्या ध्वांक्षे वज्रं मुद्गरस्वे वेषुनाशो वज्यो बेदाः पद्म
लुंबे केदे श्रः॥ धूम्रे काणे मौसले न्मूर्य्ये रौद्रोपसृत्युत्यानकालात्रसर्वे॥ ध्वांक्षे वज्रमुद्गरयोगे षुइषुनाद्यः पंचययो
वर्ज्याः पद्मलुंबयोगयोर्वेदाश्च नस्त्रोघटिवर्ज्याः॥ एवं गदे श्रसवः सप्ताघटिकाः धूम्रे न्मूरे कें वघटिकाणेघटिकाद्वयं मुस
लयोगे घटिके द्वे॥ रासमरसृत्यातकालाः षट्घटिकात्मकाः सर्वेपि वर्ज्याः॥ अत्र नेत्रे कनुक्रेपि स्थिरं योगे घटिकात्रयं जं
उक्तं च ज्योतिःसारसागरे॥ ध्वांक्षे नेत्रमुधमुजरे षघटिकास्ता ज्यास्तु पंचादितः॥ पद्मालंबकयोश्चतस्र उदिता धूम्रे सदे
कापुनः॥ द्वेकाणोमुसुलाक ये पि च गदे सप्तैव तिस्रश्चरे मृत्युत्पातकरस्वादिनगत्वास्ताः कालदंडे तया॥ अत्र दिनचारे ना
दे

होरा त्रमुच्यते॥ पश्चात्संवकयोस्त्यित्रा इश्लेषअर्कादीनुराधार्थः अथ दोषावापन्नतान् रवियोगानतुरुनाह॥ सूर्य
२६ नाडे दृगोतर्कदिग्विश्वनखसंमिते॥ चंद्रे हौरविर्योगाः स्युर्दोषसंचयविनाशकाः॥ सूर्यो यस्मिन्नक्षत्रेस्ति तन्नक्षत्रादिन
नक्षत्रमित्यर्थः॥ तस्मिन् चतुर्नवषट्दशत्रयोदशविंशतिसंख्याके सति रवियोगाः स्युः कीदृशाः दोषाणां संचयः समूहस्त
स्यविनाशकारकाः इत्यर्थः॥ उक्तंच वसिष्ठेन सूर्याच्चतुर्थे दशमे च षष्ठे विश्वे नके विंशतिके नवे ही॥ नवंति षड्ऋतुमहा
योगा कुयोगविध्वंसकराश्च नेष्टिति॥ अथ सूर्यादिवारेषु नक्षत्रविशेषु सिद्धियोगानिंद्रवंशोपजातिकामाह॥ सूर
र्येर्कमूलोत्तरपुष्यदास्रं चंद्रे श्रुती ब्राह्मशशीज्यमैत्रं॥ भौमेश्व्यदितिबुध्नकृशानुसार्पं ज्ञे ब्राह्ममैत्रर्क कृशानुचांद्रं॥ रमः०
जीवेंत्यमैत्राश्व्यदितीज्यधिष्ण्यं शुक्रेंत्यमैत्राश्व्यदितिश्रवोनं शनौ श्रुती ब्राह्मसमीरवानि सर्वार्थसिद्ध्यै कथितानि
पूर्वैः २५ विवारे हस्तमूलस्तु उत्तराश्च पुष्याश्विनीनक्षत्राणि योगाः सिद्धिस्युः चंद्रे श्रवणरोहिणीमृगपुष्यानुराधासि २६
धियोगाः एवं भौमे अश्विनीउत्तराभाद्रपदाकृत्तिकाश्लेषाः ज्ञे बुधे अनुराधा हस्तकृत्तिकामृगः गुरौ रेवत्यनुराधाश्विनीपु

मैत्री ति ९

नर्वसुष्याः॥शुक्रेरेवतीपूर्वाफाल्गुन्यश्विनीपुनर्वसुपुष्यःश्रवणाः॥शनौश्रवणरोहिणीस्वातीनक्षत्राणिसर्वार्थसि
द्ध्यैसमस्तकार्यसिद्ध्यैपूर्वैराचार्यैः॥कथितान्युक्तानिअत्रैतेसिद्धियोगाः॥शास्त्रादर्केणमृगादिदोइत्यादिप्रकारेणा
मृगादिदैनंदादिसमीश्वानयोगसंबंधिनस्तत्संबंधिरूपनिबद्धाः॥अतएवानयोपपद्ययोरार्षमूलाभावः॥अमुमे
वाशायैमनस्यत्तिसंधायजडाम्भोहृज्ज्योतिसागरादिनिबंधेषुस्वेच्छयान्यूनानाधिकनक्षत्रैःसिद्धियोगाउक्ताःतत्र
भौमपराक्रमः॥मूलरेवतीपुष्यकरोत्तराणिवेथामृगोकः॥श्रवणांबुसोमे॥कृत्तानुपुष्योत्तरत्नानिनैमेबुधेतुराधाश्व
रुणाः॥हस्तान्तुः॥गुरुहस्तोपुनर्वसुवनगोश्वितीवश्रवणाःशुक्रे॥शनैश्चरेस्वातिपितामहेच्छयोगाःकिलैतेमुनदायन
सुरितिदीपिकायांचभ्रुवगुरुचरमूलापौष्णमान्यर्कवारेइत्यादिभिःनित्रक्षत्रैःसिद्धियोगास्तिथानंपुक्तमेवहस्त
मर्ककारेदाविंडुमंभयमंकुजेसोमेमित्रनमस्वार्यपुष्यंपौष्णंमृगोसुते॥रोहिणीमंदेवारेतुसिद्धियोगाऊयाश्रमो
तिनारदौकश्वनार्षीसिंन्यपेक्षत्रएवेतिस्वयंपुनर्नोक्तिः॥२५॥अथोत्पातमृत्युकाणसिद्धियोगातरणान्त्या

हादीशात्तोयाद्वासवात्पौष्णनाद्य ब्राह्मात्पुष्यादर्यमर्क्षाद्युगर्क्षैः स्यादुत्पातोमृत्युकाणौच सिद्धिर्वारे अर्कादितत्फलं
नामतुल्यं २६ आदित्यवारादिषु क्रमात् द्विशात् विशाखातः तोयमात् पूर्वाषाढातः वासवात् धनिष्ठातः पौष्णनाद्य रेव
तीतः ब्राह्मात् रोहिणीतः पुष्यात् अर्यमर्क्षात् उत्तराफाल्गुनीतः आरभ्य युगर्क्षैः चतुर्भिश्चतुर्भिर्नक्षत्रैः मूलं सि
धिः एवं सोमे पूर्वाषाढ उत्पातः । उत्तराषाढा मृत्युः अभिजित्काणः श्रवणः सिद्धिः भौमे मृत्युः धनिष्ठोत्पातः शतता
रका मृत्युः पूर्वाभाद्रपदा काणः उत्तराभाद्रपद सिद्धिः बुधे रेवती उत्पातः अश्विनी मृत्युः भरणी काणः कृत्तिका सि
द्धिः गुरौ रोहिणी उत्पातः मृगो मृत्युः आर्द्रा काणः पुनर्वसु सिद्धिः शुक्रे पुष्ये मृत्युः उत्पातः अश्लेषा मृत्यु मघा काणः पू
र्वाफाल्गुनी सिद्धिः शनावुत्तराफाल्गुनी उत्पातः हस्तो मृत्युः चित्रा काणः स्वाति सिद्धि योग इत्यर्थः तदुक्तं नारदे
न देन विशाखादिचतुर्वर्गमर्कवारादिषु क्रमात् उत्पातमृत्युकाणाख्या योगाश्चामृतसंयुताः अमृतं सिद्धिः
ननु चायं पुनरुक्तः श्लोकार्थः आदित्यवारादिषु हस्तादर्कमृगादिंदावित्यादिप्रकारेणानंदादियोगगण

नयाद्युत्पातमृत्युःकाणसिद्धियोगाएवंसंतवंतितान्येकिंत्वसूर्येकस्मिन्नेवचरपुष्पदास्वमीतिफलाधानामेवसिद्धियो
गात्तिधानात् मुक्तिश्चव्यतेवालानांत्रीभावबोधार्थंतयोक्तिः अथवापवर्ज्याणितेउत्पातमृत्युकाणाःसिद्धियो
गोप्यतिप्रशस्ताइत्येतदर्थंतयोक्तिःननुतर्हिदग्धानेदेवपरिहारोवक्तव्यस्तमाणोनुपपन्नःसत्यंकार्यस्यावश्यकर्तव्य
त्वेसमीचीनदिनांतराभावेपवादप्रवृत्तेरितियुक्तमुत्पन्नपापामःतत्फलमितितेषामुत्पातमृत्युकाणसिद्धियो
गानांफलंनामतुल्यंयस्ययोगस्ययावद्रूपंनामतयोगसत्वेप्रारब्धकार्यफलमपितादृशमेवेत्यर्थःउक्तंचनार
देनयोगायज्ञाफलदास्ववष्टाविंशतिसंज्ञकाइति॥२६॥अथदुष्टयोगानांदेशेनेदेनपरिहारमनुष्टुभाह
कुयोगास्तिथिवारोत्थास्तिथिनोत्थानवारजाः हूणवंगखशेष्ववर्ज्यास्त्रितयजास्तथा॥२७॥तिथिवारोत्थाकुयो
गाःक्रकचादयःतिथिनोत्थाअनुराधादितीयायामित्यादयःनवारजाःयाम्यंत्वाष्ट्रंवैश्वदेवमित्यादयःतथा
त्रितयजास्तिथिवारनक्षत्रजाःवर्जयेत्सर्वकार्येषुहस्तार्कपंचमीतिथौइत्येवमादयस्तेसर्वेदुष्टयोगाः

मु.दी.
२९

एवंगोप्राच्यदेशेगौरवङ्गोदेशेगंउत्तरस्यांदिशिप्रसिद्धस्तत्रैतेवर्ज्याः अन्यदेशेषुनिषिधानभवंतीत्यर्थः
सिद्धिमेवउक्तंनारदेनतिथिवारोद्भवानेष्टयोगावारभसंभवाः ८ एवंगौरवङ्गेभ्योन्यदेशेष्वितेषुनमहः
अत्रतिथिवारयोर्वारर्क्षयोश्चरूपलक्षत्वात्युते अस्पृष्टावपिपरीहारोज्ञेयाः २७॥ अथसप्तसुशुभनक्षत्रे
ववर्ज्यपदार्थानाहशार्दूलविक्रीडितेनाहसर्वेस्मिनविधुयुक्तुपालवावर्धेनिशार्क्षे॥ दैविष्णंशंवैकुलवां
शकंयहणतःपूर्वंदिनानांत्रयंउत्पातग्रहतोग्रहांशमुशुभनक्षोत्पातैःचतुष्टंदिदिनं॥ षण्मासंग्रहभिन्नमंग
र्तेशुभेपोधुतयोत्पातनं॥२८॥ हेपंडिसर्वस्मिनशुभेकार्येएतानिवस्तूनिवैनिश्चयेनत्यजपरिहरेत्यर्थः॥ राम१०
कानीत्यतआहविधिवितिविदुश्चंद्रःपापाःक्षीणचंद्रःसूर्यनैमशानयःह्रीणंदुष्कर्ममहीसुताकेतनयाःपा २९
पापाबुधस्तैर्युतइतिवराहोक्तेःराहुकेत्वोरपापित्वंदीपिकायामुक्तंअर्थेनेन्दुर्केस्वरःपापाज्ञस्तैर्युतोप
रेशुभाःपापैतमकेतुविरुद्धधर्मोशिरोदितावितिवसिष्ठेनापिसूर्यस्तोमन्दानिरात्रकेतवःपापसंज्ञखचराः

हूपिचंद्रपूर्णचंद्रगुरुशुक्रस्तेसोमजाः सर्वकर्मसुद्धिसोम्यखेचराइति॥ तत्राविधुनापायेनवांपायेवांय
क्षौतनुलवांतस्मनवांशोत्यजपूर्णःपिवाचंद्रोलग्नेसर्वचगर्हितइतिकश्यपोक्तेः॥ आपतिश्चसर्वार्थसिद्धि
पुशत्रीनोविलग्नइतिदेवज्ञमनोहरेगुरुःपायेंद्रूलग्नगोत्याज्योसर्वेषुशुभकर्मसुअर्कहीणांकर्किगाज
स्यकेव्याकुर्लग्नगंशुभंमिति॥ अथनिशाभोधेशास्वेदिनार्धेचयद्वात्रिंशंविंशतिपलानिदशपूर्वद
शापूर्वदशोपभ्राद्यपलानित्यजा॥ उक्तंचशार्डीये॥ मूर्खेकालोनिवसंतिमहानिशांयांदिनदलेयस्मा
त्॥ दशपूर्वदशा परतस्तस्मार्द्धज्यांनिचपलानीति॥ अथोकुनवांकंपायग्रहनवांशंत्यज्यायदाह
नारदः करोग्रांशानच्चग्राह्यानशस्तास्तेनवांशकाःकुनवांशाकग्रंयस्मासवैगुण्यान्वितमिक्षरेः॥ छत्र
हेःउग्रानयजनकाग्रंशानवांशानग्राह्याइत्यर्थः अथग्रहणतःपूर्वदिनानांत्रयंत्यजग्रहणतःसूर्य
वंद्रग्रहणदिनात्प्रथमंदिवसत्रयंत्याज्यमयाहगर्गःचंद्रसूर्योपरागेषुअर्कहंप्रागस्तुनेनवेत्स[redacted]

मु॰ टी॰
२८

साहसमशुभं तं पश्चात्स्वतं ग्रहणं शूलकं उपरागो ग्रहं उपरागो ग्रहो राहुग्रस्ते त्विंदौ च पूष्णि चेत्यमरः अथ
उत्पातग्रहतोऽह्नां हांश्र्य उत्पातो नाम स्वभावतो वैपरीत्यं यदाह वराहः ते तेषां संपेहीयं प्रकृतेरन्यत्वमुत्पात
इति ते चोत्पातास्त्रिविधा दिव्यांतरिक्षभौमास्तत्र दिव्या केत्वादि अंतरिक्षो गंधर्वनगरादिः॥ भौमो भू
मिकंपादिः॥ एतदप्याह वराहः अपचारेण नराणामुपसर्गः पापसंचयाद्भवति संसूचयंति दिव्यांतरि
क्षभौमास्तमुत्पाताः दिव्यं ग्रहर्क्षवैकृतमुल्कानिर्घातपवनपरिवेषाः गंधर्वपुरपुरंदरचापादि यदांतरि
क्षं भौमं चरस्थिरभवं तच्छांतिभिराहतं शमुपैति इति तेषूत्पातादिने यस्मिन्स्युस्तद्दिनमारभ्य सप्ताहान्
सप्तदिनानि त्यज यदाह नारदः उत्पातग्रहणादूर्ध्वं सप्ताहानि वर्जयेदिति दीपिकायां च अनिष्टे
त्रिविधोत्पाते सिंहिकासुतदर्शने सप्तरात्रं न कुर्वीत यात्रोद्वाहादिमंगलेति॥ अनिष्टे अकालवृष्ट्यादिदू
षिते काले रतितचीकारो व्यातन्अह्लसहानि॥ अथ यन्मृतान्महानिचेतिकर्मधारयसमासे राजाहःस

राम॰
२८

स्वस्पृष्टजितिसमातेतर्विकृतेनस्तस्थितइतिरिलोपोवराकः पुंसीतिपुंलिंगत्वं अतएवकक्षाः प्रदेयात्त्रि
विष्णुधाम्नुरुवित्यादयः प्रयोगाः उपप्लवंतेनघात्रहतोग्रहणतः ऊर्ध्वंसप्तविनानित्यज॥ अत्रग्रहणं
ग्राहेनसर्वग्रहणं विवक्षितं ततोन्यूनत्वे त्रैरात्रिकं यदाहवसिष्ठः सर्वग्रासेदिनान्यष्टौसर्वकार्येषुवर्जयेत्
॥ षड्दिनानित्रिभागोने अर्धग्रासेचतुर्दिनं॥ चतुर्थांशे त्रिरात्रंस्यात् ग्रहणेत्वंशुसूर्ययोः नारदोपित्रिंशांशेचे
सप्तसेचे वत्साहरणतश्चैय यद्यपिविशेषेणोक्तंतथापिग्रहणादनंतरमेवज्ञेयं उत्पातग्रहणाद्दूर्ध्वंसप्ताहंतिः
खीलग्रह इतितस्यैवोक्तेः॥ अंगिराअपि। सर्वग्रासेतुसप्ताहमर्धग्रासेदिनंमेकंतुवर्जयेदिति॥ अनयोर्व्य
स्थयोर्विषयव्यवस्थादेशभेदेनाचारभेदेनवागंतव्या काचित्सामान्यतोदिनसप्तकमुक्तं यदाहगर्गः स्वर्भेवं
न्परागोभौमग्रहादोषाद्भूयावुग्नोसप्तरात्रंतयोरूर्ध्वंसर्वशोभननाशमिति। एतदपिसर्वग्रासपरंतथायोज्यं
ग्राहीयविवाहप्रत्यलेचंद्रस्यसर्वग्रासेऽन्यतोदिनसप्तकं त्याज्यमित्युक्तं हन्तस्तेचंद्रग्रेत्याज्यं प्राक्प्रश्चात्

दिवससप्तकमिति उत्पातविशेषे ग्रहणे च वक्रे त्रिदिनानि वर्ज्यानि गुरुः यदा हस्ते उष्णरः अहेर्वी श्रेरवति प्रकंपे वे
तोऽङ्गमोल्कायतनादिदोषे वतेद्रव्याणि निवदंति तज्ज्ञास्त्रयोदशाहानि वदंति केचिदिति। ग्रहणे तु कार्यस्यावश्य
कत्वविशेषे परिहारउक्तो ज्योतिर्निबंधे पंचदिनानि वसिष्ठस्त्रिदिनं गर्गस्तु कौशिकस्त्वेकं यवनाख्यायोऽ
स्यमतं पंचमुहूर्तं श्वाहूषयतिराहु रिति॥ अयं च ग्रहणे योनिषेधो नित्यनैमित्तिकादिकृत्यातिरिक्तविशे
षः। यदाह गुरुः नित्ये नैमित्तिके काम्ये जपहोमक्रियासु च। पाकर्मणि वोत्सर्गे ग्रहवेधो न विद्यत इति। ग्रहो
ग्रहणं॥ अथ शुनहोत्पाते श्वदुष्टं दिनं त्यज। शुनं कस्माणं वदंति लोके स्या इति शुनहाराणां हानायेत्युत्या।
तावसंतायतु पुरस्कारेण उत्पातविशेषः शुनाइत्युक्तं तादृशेण उत्पाते दुष्टं दूषितं दित्वा तिरिक्तकांसं वि
शेषान्वगस्यावेकत्वप्रतीते रेकं दिनं त्याज्यमित्यर्थः॥ अत्र हेतुः शुनहत्वमुत्पातानां शुनहोत्पादीती ना
रदः ऋषिपुत्रकृते श्लोके वैराहः ब्रह्मा ग्रन्तिनहीकं याः संध्यानिर्घाततनिस्वनाः परावीषरजो धूमसुरकाकौस्तु

मतोद्भवाः कुसुमोत्तरससस्नेहस्ते हन्मधुपुष्पफलोद्गमाः॥ गोपद्मनदद्दधिक्षित्रिवायुधुमाधवे।तारोल्कापात
कलुषं कपिलार्केंदुमंडलं॥ अनग्निज्वलनास्फोटधुमरेण्वनिलाकुलं॥ रक्तपद्मारुणं सायं नभः क्षुब्ध
तवोपमं॥ सरिच्छांबुसंशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत्। शक्रायुधपरीवेषविद्युत्शुष्कविरोहणं। कंपोद्वर्तनवैकृत्यं
सनं दारुणोक्षिते। नद्युदपानसरसां वृद्ध्यूर्ध्वतरणप्लवः। सरणं चाद्रिगेहानां वर्षासु न भयावहं॥ दिव्यस्त्रीभू
तगंधर्वविमानाद्भुतदर्शनं ग्रहनक्षत्रताराणां दर्शनं च दिवांबरे। गीतवाद्यप्रनिर्घोषा वनपर्वतसानुषु। सस्य
वृद्धिः अपां हानिरपाः शरदि स्मृताः। शीतानलतुषारत्वं नर्तनं मृगपक्षिणां। रक्षोयक्षादिसत्त्वानां दर्शनं वागम
नुषादिकं। धूमांधकाराश्च सनभोवनपर्वताः। उच्चैः सूर्योदयेस्ते च हेमंते शोभनाः स्मृताः। हिमपातानिलोत्पाताविरूपा
द्भुतदर्शनं। कृष्णांजनाभमाकाशं तारोल्कापातपिंजरे। चित्रगर्भोद्भवाः स्त्रीषु गोजाश्वमृगपक्षिषु। पत्रांकुरल
तानां च विकाराः शिशिरे शुभाः। ऋतुस्वभावजा ह्येते दृष्टाः स्वर्तौ शुभप्रदाः। ऋतोरन्यत्र चोत्पाता दृष्टास्ते तु
दारुणा इति। अथाग्रहनिमित्तग्रहे भौमादिभिः पंचभिः निमित्तसिद्धांतोक्तरीत्या निमित्तयोगं प्राप्तसमेता दर्शनेन तत्त्वं

मु॰टी॰ त्यजत त्र क्रूरयोगादेव दोषसत्वे युधोपधोपयातस्तु दोषाधिक्यस्त्वनार्थः सौम्यग्रहयुधे तु रुरेव दोषः अत्र
३१ केचित् यस्मिन् दिननक्षत्रे भौमादीनां युद्धं जातं तन्नक्षत्रं त्याज्यमित्याहुः। तत्र प्रमाणाभावात् तथोत्पातनमु
त्पातैः दिव्यांतरिक्षभौमैर्दूषितं न जते अयमर्थः॥ भौमांतरिक्षयोरुत्पातयोर्ग्रहयुद्धवत्प्रत्यक्षदर्शनं नक्षत्रामे
वत्याज्यं एवं नक्षत्रचतुष्टयं षण्मासं कालावधेरत्यसंयोग इति दिति यावषण्मासमभिव्याप्य तिजेत्ययमर्थः
यद्युक्तं गार्ग्येण यग्रहलेके रेसु भौमं चतये व खे च युद्धगतं ग्रह नित्र केतुहतं नं त्यजेत्सहोत्पातदुष्टं यत् यत्
हु संग्रहनिंदुष्टमक्षं शीतांशुयुक्तं च विवाहलयं॥ आ मासषट्कं विदधीत तस्मिन्। वाहया त्रा दिषु मंगनैव
नारदोपि। ग्रहणोत्पातनं त्याज्यं मंगलेषु स्तुत्रयं इति संगलेषु स्तु त्रयमिति॥ अत्र अत्यर्क इति प्रकृतिना रामः
वः गुरुरपि। उत्पातैः पीडिताश्चत्वारः षण्मासेत्र प्रकृतिं ययुः राहुकेतुविमुक्तं यदृक्षं च क्रंनियी डितं। वत्सरार्द्धे ३१
तग्रहयुद्धगतं चभं। नक्षत्रग्रहयोगेन स यदुक्तं दोषसंभवं। तदिदं सर्वकार्येषु शुभेषु परिवर्जयेदिति॥
ग्रहयुद्धभेदाश्चत्वारः भेदापसव्यरु॥ अंशुविमर्दनं अपसव्यं चेति। यथाह वाराह नराहः आसन्नक्रमयोगा

ङ्गे दोषेरखांशुनमर्दनासर्व्वैर्युश्चतुःप्रकारं पराशाराद्यैर्मुनिभिः॥ उक्तमिति। तल्लक्षणं निरूप्यते सिद्धांते। उक्तेरवस्तार
कास्पर्शाङ्गदेहेनेदः प्रकीर्त्यते॥ ननु ग्रहयुधादिकं सिद्धांत विरुद्धं। यतः कक्षासर्वा अपि दिविषदां च कलिसां
कितास्ताघत्यो ब्योमलघुनिमहतिस्युर्महत्यश्चलिप्ताः तस्माद्देते शान्ति जम्बगुजादित्पनोमेज्पमंदा। मंदाक्रांता
इवशशिधराहांति यांतः क्रमेणेति। नास्क राश्वैर्यो क्रैम हांतरोर्ध्वाधोभावेनावस्थितानां ग्रहाणां युधासंभवएव
लोके द्विससीपवर्त्तिनोपुंसोयुधादिदर्शपतेतत्कथमियमत्रशास्त्रेग्रहयुक्तोक्तिः सत्यं॥ अत्र युक्तिः पुरःसरं वराहएव
समादद्दातिस्मवियतिचरणां ग्रहाणां उपर्यपात्समार्गसंस्थानां अतिदुरादृग्विशायेसमता मिवेसंप्रयातानां॥ न
त्रासन्नक्रमयोगाद्भेदोल्लेखांशुमर्दनासरखेः॥ युद्धंचतुःप्रकारं पराशाराद्यैर्मुनिभिः। उक्तंमिति॥ तेन न्नूवर्तिनोरा
ज्ञामन्येषां वाशुभाशुभफलसूचनार्थंयुद्धसमागमन्योन्यमार्गतइति॥ ननु यथाग्रहणांतीर्थसंधोनवतितथा
नक्षत्रद्वयसंधोजायमानं किंनक्षत्रंदूषयति किंपरं किंपूर्वं किंउभयमिति॥ अविशेषादुभयमिति वयंब्रूम

मु॰ दी॰ ॥ यदुक्तं शार्ङ्गीये विवाहपटले। यस्मिन् विधुं राहुरिनं वधियोपगच्छति तत्स्याज्यमृतुत्रयं स्यात्॥ पाणिग्रहे
३२ शुभरणं विधत्ते द्वयोर्न योश्चेद्वयमेव जह्यात्॥ अथ ग्रासत्वपक्षद्वये ग्रहणे किं द्वयोस्त्याज्यः षण्मासमुत कस्य
चित्कश्चिदिति शेषः॥ अयमपि निर्णयस्तत्रैवात्रैवाभ्यधायि॥ पक्षांतरेणाग्रहणद्वयं वा यदा तदादिग्रहणो
पभंगं पक्षादिशुध्येनवतिद्वितीयं पाणिग्रहे शुध्यति नो गषट्कात्॥ इत्यलमतिप्रसंगेन॥ अथ ग्रासनेदेन कि
यत्संख्याकेषु मासेषु ग्रहणीयनक्षत्रनिषेधंतया प्राग्दिवसांश्च निषिध्यानि कवज्राद्यं दसाहनेऽपंग्रहहें
सकलकलार्धपादग्रासे क्रमात्सर्कगुणेंदुमासान्। पूर्वं परस्ताद्ग्रहणयोस्त्रिघस्राग्रस्तेऽस्तगे वाभ्युदितेऽर्द्धखंडे। रामः १
॥ ग्रहर्क्षेत्रेकमात्संपूर्णार्धचतुर्थांशग्रासे सति। षट्त्रीकमासान्नेष्टं यथा ग्रहणसंनं सर्वग्रासे मासषट्कं त्र्य ३२
र्धग्रासे मासत्रयं चतुर्थांशग्रासे मासमेकं त्यजेदित्यर्थः॥ दैवज्ञवल्लभगुरुः॥ सर्वग्रासे तु षण्मासांत्रीन्मासांश्चार्द्धल
ग्रहे॥ आपादग्रहणे दिष्टं मासमेकं विवर्जयेत्॥ अथ पूर्वमिति॥ कस्मादित्यनुवर्त्तते अत्रापि ग्रस्ते स्तगे ग्रस्तास्ते

पूर्वं त्रियस्त्रादिनं नेष्टं ॥ अथ गुर्वादिअस्ते तानि निषिद्धानि समीक्षि नानि ॥ तथा अस्ते अभ्युदिते अस्तोदये परस्तात्
श्चादिनं विविसिद्धेषे स्तसत्वेति । कश्यपोपि । अस्तोदये पुरो दोषो अस्तास्ते वार्क त्र्यहं न योः ॥ मुनिशार्थे तु नयं
तत्खंडी खंड व्यवस्थयोरिति वसिष्ठोपि । अस्तोदये पक्षवार्द्धमनिष्टमादौ अस्तास्तमाने प्युडमासपक्षं कि
ति ॥ अतो खंडग्रहणादिस्मृत्वे पि अस्तोदय अस्तास्तत्वा स्वस्था नावाप्पूर्वपक्ष्यस्त्रो कं दिनानि वर्ज्यानीति का
लं त्र विषयविवेकः ॥ अथ सामान्यतो अवश्यवर्ज्यानि पंचांग शुद्ध्यादिनि वसंततिलकया नुष्टुभावाह । जन्मर्क्ष
मासतिथयो व्यतीपातनक्षत्रवैधृत्य मातापितृ दिनानि तिथिक्षयवृद्धी न्यूनाधिमासकुलिकप्रहरार्द्धविं कंनक्षत्र
घटिकात्रयमेव वर्ज्यं परिघार्द्धं पंच अश्लेषमघ घंडादि ॥ गंड योः व्याघातेन वज्राद्यश्च वर्ज्याः सर्वेषु कर्मसु । जन्
मर्क्षमासतिथिप्रसूतयः पद्यार्थः सर्वेषु शुभकर्मसु वर्ज्या इति द्वितीयश्लोकेनान्वयः ॥ तात्पर्यार्थानाह जन्म
र्क्षेति । यस्मिन् नक्षत्रे जन्म ते नक्षत्र जन्मनक्षत्रं यस्मिन्मासे जन्म न वेत्स जन्ममासः ॥ यस्यां तिथौ जन्म सैव जन्मति

मु॰ दी॰
३२

एतेन वर्ज्याः यदाह वसिष्ठः स्वजन्ममासर्क्षतिथिक्षयेषु वैनाशिकादृक्षगणेषु नेष्टं ।। नो द्वाहमात्मान्सुद
यान्निलाषिन्नेवाद्यगर्भे हितयं कविल्ल ।। अयं च जन्मनक्षत्रे त्रे मासक्ति पिनिषेधो आदिगर्भस्यैव । यो द्वा
ह नाद्यः । न जन्ममासे जन्मर्क्षे न जन्मदिवसे पि । बा । अद्यगर्भे सुतस्याद्यदुहितुर्वा करग्रह इति ।। अनेन
अद्यगर्भेत्पत्तिरिक्तकन्याया स्यादेवासुरस्य च जन्मर्क्षमासतिथिषु शुभफलत्वमुक्तं भवति । अन्न रा
वाहव्यवनः जन्मर्क्षे जन्ममासे वा त्वारायाम च जन्मनि जन्मलग्नेन वैद्वाह्यपु श्राधापतिवद्ध्याइति ।।
अथ जन्ममासलक्षणं जगन्मोहने कर्गः ।। आरभ्य जन्मदिवसं यावत्त्रिंशद्दिनं भवेत् । जन्ममासः राम: १
परिज्ञेयो गर्हितः सर्वकर्मसु ।। इति कर्गः ।। ३ ।। अस्यापि विविशेषस्तत्रैव जातं दिनं दूषयते वसिष्ठः ३३
पः पंचैव गर्गः स्विंदिनं तथात्रिः ।। तज्जन्मपक्षं कलनामुरिश्च व्रते विवाहे गमने त्दुयेचेति ।। वस्तुतस्तु यस्मि
श्चांद्रमासे चैत्रादौ जन्मान्तस्तं चांद्रमासो जन्ममासस्तयात्याज्य इति युक्तमुत्पश्यामः । इं ज्ञामीइं दूषयेते मास

दिसम्प्रकीर्तितः॥ आग्नेय्येमोऽस्थितोमध्येसमासेपितृसोमके इति हारीतवचनात्॥ उपवासव्रतोद्वाहया
त्राह्मौरापनयनंतिथिवर्षादि निखिलंवांङ्मानेनगृह्यत इतिकश्यपोक्तेश्च॥ अथातिथिश्शेवसिष्ठवा
क्यस्वरसाद्युक्तः। अतएवनारदसंहितायांरत्नमालादिग्रन्थेषुचदिवसपदंतिथिपरंव्याख्येयं॥ अन्यथा
जन्मवारेष्वतिप्रसंगःस्यात्॥ अथव्यतीपातोवर्ज्यः सप्तविंशतियोगेषुव्यतीपातोनामयोगःस्पष्टस्तथैवंन
योगाजन्मासदृशप्रसंख्याकोनिंद्यः॥ उक्तंचवसिष्ठेन॥ सर्वेथतोयोव्यतिपाताख्ययोगःसर्वोप्यनिष्टःपरियार्थ
मायमिति॥ तथानक्षवर्ज्यो॥ नक्षसप्तसंकरणंवर्ज्यमाहवसिष्ठः॥ नकुर्यान्मंगलंविद्यांजावितार्थीकदा-
चनकुर्वन्नशस्तथास्विप्रंतत्सर्वंनाशनांव्रजेदिति॥ नक्षत्रेष्टविरंगविनागकल्पनंचविशेषतोवर्ज्येवक्ष्य
ते॥ तथावैधृतिःपूर्वलक्षणलक्षितःसप्तविंशतीसंख्याकोयोगोनिंद्यः॥ अत्रसंमतिपूर्वमुक्ता॥ अथसाना
मेकदेशेनामग्रहणमितिन्यायमनुसत्यजीमोक्तं॥ भीमसेनइत्यादिवदमावास्यानिंद्याः॥ सहैवद

मु॰ टी॰ ३४

र्शे पितृकर्मविकं नान्यद्विधेयं शुभयोष्टिकाद्यं ॥ मू॰ दे॰ ह॰ तंतत्र शुभोत्सवात्संघविना शमायात्पचिराद्दसंतद्दि
तिवसिष्ठोक्तेः ॥ अथ पितृदिनं माता च पिता च पितरौ पुमान्स्त्रियेत्येकविशेष ॥ पित्रोर्दिनं मातापित्रोर्मर
णदिनं श्राद्धदिनमिति यावत् तद्दपि निषिद्धं यदाह शार्ङ्गधरः ॥ नक्षत्रं यामकुलिकं वृती पातं वैधृतं च परि
धार्धकौ तिसमस्तं जह्यात्संक्रांति द्वयदिनं पित्रोरि ॥ अथ तिथित्रयस्तिथिवृद्धिश्चैतेव जैर्य अनयोः प्रसिद्ध
त्वाद्य लक्षणं नोक्तं ॥ तत्र तिथित्रयस्तिथिवृद्धि लक्षणं ॥ यत्र यो वार स्तिथित्रयं तं स्पृशति तत्तीय तिथिः ॥ कं
विं दादिनागमपि स्पृशति तत्र वारे मध्यमा तिथिस्त्र्यस्पृक्संज्ञा ॥ यथा नवमी रवौ घटिका द्वयं पुनर्दशमी र
वौ षट्पंचाशत्घटिकाः ५६ ॥ एकादश्याश्च घटिकाचतुष्टयं रविवारेण सह संबद्धमिति त्रिस्पृक्संज्ञि
ता अवमसंज्ञितेत्यपि वदंति ॥ यथा तृतीया रवौ अष्टपंचाशत् घटिका ॥ ततश्चतुर्थी सोमे षष्टिघटिका
६० ततो भौमवासरे चतुर्थी घटिकात्रयं ॥ इति ॥ अत्र चतुर्थी वारत्रयसंबंधात्तिथिवृद्धिसंज्ञा यदाह व

रामः ३४

सिष्ठः स्मृतिस्तिथयोर्वारे एकस्मिन्नवमा तिथिः। तिथिर्वारत्रयं स्पृशेत् का त्रिद्युस्पृक् देवनिंदिते॥ इत्येतयन्मंगलं तत्र
यत्रिस्पृक् त्र्यवमे दिने। नस्मानवतितत्क्षिप्रमयो सम्यक् यथ्यैधनमिति॥ देवनिंदिते इत्यत्र संधिरूवार्षः इतः
इदु देदिवनमितिप्रभ्रमय्यस्मिति प्राग्त्यसंज्ञायां संध्यभावप्रसक्तेः॥ अथ प्रसुनक्षत्रावद्रूपकत्वे तिथिक्षय
तिथिद्वयोपरिहारमाहदेवापवादाध्याये वसिष्ठः॥ अवमाख्यं तिथियोर्देषं केन्द्रगो देवपूजितः॥ यद्वत्पाप
त्वयं हंतिव्रतं देवार्षिकं यथा विधुस्थगा क्रूयं दोषं सौम्यः केन्द्रगतः सदा॥ यद्वत्पापचयं हंति हंति अब्दस्य दाय
न व्रतामिति॥ अथ न्यूनाधिकमासो व ज्यैः अ संक्रांतिमासः स्फुटः स्यादिसंक्रांतिमासो ऽहृयारव्यः कदा
विदिति। इयोरपि लङ्घनं सिधांतज्ञारोमणौ वनिहिते॥ अथ शृद्रयिसंक्रांतिप्रकरणे स्पष्टार्थक संक्रांति
विहिनया युक्तो मासो धिमासः क्षयमासकस्तु द्विसंक्रम इति वक्ष्यतीगतच्यतत्रे वसम्यक् व्याख्यास्याते॥
तदुक्तं वसिष्ठसंहितायां यस्मिन् दर्शांतात् द्विवोगे का परं दर्शांजं ध्रुवं अवनवतिमावोः॥ संक्रांतिसोधिमासः

मु॰ दी॰ ःस्यात्॥ अथांतदर्शयोर्मध्येभानोरेवंतत्रोर्यदासंक्रांतिर्दिनंयस्याश्चेन्यूनमासःसउच्यते॥मास्यथानारविलमे
३५ वकर्मेनुखिलंकर्मनकार्यमत्र॥यज्ञोपवासव्रततीर्थयात्राविवाहकर्मादिविनाशमिति॥अथकुलीकःवा
रसंबंधामुहूर्तदोषोवर्ज्यः तथाप्रहरार्धवारसंबंधीनामाईयोर्वर्ज्यः॥यदाहवसिष्टःनिधनंप्रहरार्धेतुनिसं
त्वयमघंटके॥कुलिकसर्वनाशायज्ञातावेतेनदोषदाविति॥कुलिकादीनदोषानग्रंथहृदयेवक्ष्यति॥अथ
पातोमहापानोमहागणितसाध्योव्यतीपातनामकोवैधृतिनामकश्चवर्ज्यः॥यदाहनारदः यस्मिन्दिनेमहापात
स्तद्दिनंवर्जयेच्छुभे॥अपिसर्वगुणोपेतंदंपत्योमरणप्रदमिति॥कश्यपोपि॥महावैधृतीपात्यांहूर्षिहूतेलग्नमु राम॰
हूर्तं॥राजावधूतंपुरुषंयश्वत्समेपरेत्यजेदिति। पातोव्यतीपातःमहाशाऽस्त्रस्मेकंत्रिसंबध्यते॥महावैधृति ३५
र्महाव्यतीपातःचतास्यामित्यर्थः॥महापातोनामरवीन्दुक्रांतिसाम्यंतदानयनंतुगंतुणितग्रंथेस्यःस्वयंसिधाना
दिसोज्ञेयं॥ततोमहापातकालेनिर्णियतत्कालस्यातिसूक्ष्मत्कस्मिन्कालेव्यंगत्यनिषिद्धमित्याशंक्यमहाप

तस्थितिकास्वनयनमप्युक्तं तत्रैव तन्नयोजनं सूर्यसिद्धांते॥ आद्यंतकालयोर्मध्ये कालोज्ञेयोतिदारुणः॥ प्रज्व
लज्ज्वलनाकारः सर्वकर्मसु गर्हितः॥ स्नानदानजपश्राद्धव्रतहोमादिकर्मसु॥ प्राप्यते सुमहच्छ्रेयः तत्कालज्ञान
मातस्तथेति॥ अयं तकालोस्य ग्रीमो स्वस्थितिरूपो॥ सिरोमणावप्युक्तं॥ पातस्थितिकालांतर्गमं संलक्ष्यतेन यस्य
तेतज्ज्ञैतत्॥ स्नावजपहोमदानादिकं मात्रोयेनिखलुवृद्धिमिति॥ यन्तु वसिष्टेनोक्तं महापातो वैधृतिश्च उपरा
गोसमस्तवा॥ तस्मादितत्रयंत्वा ज्यमध्यपूर्वापरानिंधमिति॥ वराहेणपिष्टहश्चात्रायांतक्तं रण्यो धनंदिय
त्तिव्यतीपातोगोमत्स्यंदत्वंददातिनविरादपिवर्द्धमानः॥ संतापनरो केणदापभ्रनेयान्तातस्मादिनत्रयमपि
प्रजहीतविवानिति॥ तदेतत् वचनत्रयमपि महापातोपयोगिणिताशाक्तकदामहापातः स्यादितिस्तस्मम हापा
पतकस्थितिकालाज्ञानाद्विवाहप्रकरणे॥ पंचास्पाजाविति वक्ष्यमाणाणात्यास महापाते संभावनायर यापातदि
वसं निर्णीयं पूर्वापरवर्तमानदिनानां त्यागपरमिति सति नातियस्मिन्दिने महापानस्तद्दिनं वर्जयेच्छुभेइतिनार

द्वादशमप्येवमेव व्याख्येयं॥ यद्गतस्य महापातुतस्य स्थितिस्तूपस्तूस्मकालज्ञानं स्यात्तदा स्थूलात्सूक्ष्मं जायत इति न्या
येन स एव पातमध्यकाले विवाहादिमंगलकृत्येषु त्याज्ये॥ अन्यथा गणितस्थितिकालानयने स्पष्टवैयर्थ्यप्रसंग इति निष्कृ
र्षः॥ विष्कंभेति विष्कंभयोर्वज्रयोगयोः आद्यमातिक्रमे कारणाभावादादिमं घटिकात्रयं एव वर्ज्यं॥ तथा परिघस्य प
रिघारव्ययोगस्य घटिकानामाद्यं अर्द्धं त्याज्यं॥ शूले पंचादिमा घटीवर्ज्याः॥ गंडातिगंडयोर्योगयोराद्याः षट्नाड्यो॥
व्याजर्प्यः॥ व्याघातयोगे नववाद्यमाना घटी वर्ज्याः॥ यदाह श्रीपतिः॥ प्रथमस्य चार्धं तिस्रस्तु योगे प्रथमे वज्रो व्यातसंज्ञे
नवमपंचशूले॥ गंडेतिगंडे च षडेव नाड्यो॥ शुभेषु कार्येषु विवर्जनीयाः॥ तत्तु स्पष्टो इदं कस्य विशेषणं प्रथ
मयोगस्य व्याघातयोस्तवाक्तिन्नघटिकानिर्देशादुभयोस्तावद्विशेषणमुक्तं॥ अत्र ब्रूमः॥ प्रथमस्यैव
विशेषणं वज्रयोगस्य दिते प्रथमस्य योगे विष्कंभयोगे तिस्रो नाड्यो वर्ज्या इत्यर्थः॥ किमत्र प्रमाणमिति चेच्छृणु
ःकश्यपादिवाक्यस्वरसात्॥ यदाह कश्यपः॥ योगयोर्वज्रविष्कंभयोस्तिस्रः षड्गंडातिगंडयोः॥ व्याघाते नव शूले तु पं

चवैनाप्यस्तुगर्हिताइति॥नारदोप्येवमेवाह॥अनेनविष्कंभाद्यघटीत्रयंवज्रकंव्याघातकज्रंाःनवंइतिवेद
न्महेश्वरः॥प्रत्याख्यातोभवतिएवंचविष्कंभाद्यत्रिनाडीशुभनस्तत्रिषुचगंडयोःपंचशूलेव्याघातेवज्रकिंकाइति
नाणे— ज्योविर्विदुक्तिरक्तिरपिचिंत्या॥अथप्रहरंप्रतिथ्यारावरपकत्वेसतितत्त्रिष्यवर्ज्यघटीश्चाहअनुष्टुभा
ह॥वेदांगाष्टनगाष्टनवांकेभ्यप्रहरंप्रतिथ्योत्पजेत्॥वज्रस्तुकमनुतत्वाग्राः शरनाडीपराःशुभाश्चतुर्थषष्ठी
अष्टमीनवमीद्वादशीचतुर्दशीएताःपक्षरंध्रसंज्ञास्तिथयोज्ञेयाःआसुशुभंनकृत्यावरपकत्वेसतिक्रमादि
शादिमाःमन्वंकवसुतत्वाग्राःशरनाडीस्त्यजेत्॥यथाचतुर्थ्यामादिमाअष्टघटिकाःषष्ठ्यांनवअष्ट
म्यांचतुर्दशानवम्यांपंचमविंशतिद्वादश्यांपंचघटिकास्त्याज्याइत्यर्थः॥अथपराशरोदितानाड्यःकृत्येषु
नाशुभाज्ञेयाः॥यदाहनि॥दैषपला ध्यायेवसिष्ठः॥चतुर्दश्यांचतुर्थ्यांचअष्टमीतथा॥षष्ठीचद्वादशीचैव
पक्षछिद्राह्वयाइमे॥क्रमादेतासुतिथिषुवर्जनीयाश्चनाडिकाः॥भूताष्टमनुतत्वांकदशशेषासुशोभना॥

॥दोषनाडीषु यत्कर्म शुभं सर्वं विनश्यति॥ विवाहे विधवा नारी वाज्यः स्याद्रोपनीतो मृतो गर्भे न नाशः स्यात्प्रतिष्ठायां
विशेषतः किमत्र बहुनोक्तेन कृतं कर्म विनश्यति। कश्यपस्तु सर्वसाधारण्येन दशैव घटिकास्त्या
ज्या इत्याह अष्टमी द्वादशी षष्ठी पक्षरंध्रासु तासु च॥ मंगलेषु सर्वदा त्याज्यास्तु तं द्विदश नाडिकाः॥ ए
तस्यां भवति तिथिवारनक्षत्रयोगा अकस्य पंचांगशुद्धिः पंचांगशुद्धिस्तुक्तं नारदेन। तिथिवारर्क्षयोगा
नां करणस्य मेलनस्य नं पंचांगस्य शुद्धिः स्यात्। पंचांगशुद्धिरुदाहृता। यस्मिन्पंचांगदोषोक्तिता
स्मिन्नयं निरर्थकमिति॥ ३६॥ अथ कुलिककालवेला यमघंटकदोषमनुष्टुभाह॥ कुलिकः कालवे
लाश्च यमघंटश्च अर्कके॥ वाराद्विघ्नेक्रमान्मंदे बुध्य धेजीवेकुजेक्षणाः ३७॥ वारात्तेन मा वारान्मंदे द्विघ्ने इत्युरे
गणिते सति॥ योंकोत्र वेलस्मिं तद्विगुणो योंकः स्तत्संख्यः क्षणो मुहूर्तः कुलिको भवति एवं कर्मानु वारात्॥ बु
धे जीवे जीवे कुजे गणिते ततो गुणिते सति यो कः संक्रमात्का लवेला यमघंटकं टकसंटकाः दुष्टमुहूर्ताः

ः॥यथारवितःशनिःसप्तसंख्याकःसद्विगुणश्चतुर्दशजातस्तत्संख्याकोमुहूर्त्तःकुलिकसंज्ञोरविवारेभ
वतिएवंरवावष्टमोमुहूर्त्तःकालवेलातथारवौदशमोमुहूर्त्तःयमघंटः॥तथारवौषष्ठोमुहूर्त्तःकंटकसं
ज्ञइत्यर्थः॥एवंसोमवारादावपिकुलिककालवेलायमघंटकंटकाःस्फुरित्यर्थः॥यदाहकश्यपःशैलाद्रिवेद७।
५।४॥स्तर्काब्धिनगा६।३।४॥७।पंचाग्निबाहवः॥५॥३॥२॥वेदाग्निबाणा४॥२।५॥लोकैकेना॥-१॥स्वद्विगिरि
वह्नयः२७।३चंद्रर्तुतर्का॥१।६।१।कुलिकयमघंटार्द्धयामकाः॥प्रहरार्द्धप्रमाणंतेभानुवारादितःक्रमात्
॥अत्रार्द्धयार्द्धयामःसपूर्णःस्याज्योत्यर्षन्त्वात्।कुलिकयमघंटकयोःतत्परार्द्धस्याज्यत्वंउक्तंचदैवज्ञमनोहरे।
अहनिनिशिगणानांयःस्वेदिनेशादिकानांभवतिगुरुस्सोमशार्किकालक्रमेणप्रभवतियमघंटःकंटकःका
लवेलाकुलिकइतिविरुद्धस्तत्परार्द्धंरिनिषिधंगजाशोर्द्धप्रहरः॥एतेमुहूर्त्ताःदिनदोषदिनशोडशत्वेनज्ञेया
गजाश्चइत्युक्तास्तत्परार्द्धेनिषिद्धमित्युक्तेःदोषफलाहवसिष्टःनिधनंप्रहरार्द्धेतुतिस्त्वंयमघंटकेकुलि

मु.टी. केसर्वनाड्यास्यात्‌रात्रावेतेन ह्येतेनदोषतः॥कंटककालवेलयोरन्वर्थत्वादत्र फलंनोक्तंरात्रावेनेनदोषइ
२९ त्यस्यार्थेवादोरन्त्रकोणेनमस्विनागंधमुपेत्यवारदोषास्तथाश्च॥किमनाप्नुवंतः॥अंधुंसमासाद्यविलासिनीनांक
टाक्षवाणाइवतिक्ष्णास्युः॥तथान्यत्रवारदोषाःप्रभवंतिरात्रौहंद्रेज्यदिवाकराणांदिवाशशांकार्कज
भूसुतानांसर्वत्रनिंद्योबुधवारदोषइति॥ज्योतिर्निबंधेतूक्तिः॥संगच्छतेश्रियमुपनष्टत्वावस्पकत्वेदोषमेदे
नयमघंटकादिदोषपरिहारमाहगर्गः॥विंध्यस्योत्तरकूलेतुयावद्गातुहिनाचलं॥यमघंटकदोषोस्तिनान्य
देशेषुविद्यते॥मत्स्यागस्त्यगथाग्रेषुयमघंटस्तुदोषकृत्॥कावेरीरेकुलिंकेतुंष्टेअर्धयामस्तुसर्वतइति।३७॥अ राम: २
थप्रसंगादिवारेषुशिष्याणांसपवरावदोषज्ञानार्थंमुहूर्त्तादिनात्रकालमुहूर्त्तदोषानाह।हलविक्रीडितवृ २९
त्तिलकास्यामाह॥सूर्येषद्रुस्वरनागदिग्मनुताश्रंब्दोधृषद्दकुंकुरांकाकीविध्मपुरंदराद्रितिसुतेर्लाग्नधितकी
दिशाः॥सोम्योविधिगजांकदिग्मनसितार्जीवेदिषद्रुनास्कराःशाक्रौशित्ययकलाग्रन्त्रगुजेवेदेषुतर्काग्रहाः॥३८

दृष्टि क धि ज रथ्या दृष्यादि

दिग्भास्कराः मनुमिताश्च शनौ शशिद्विनागा दिशोऽग्निवदिवाकरसंमिताश्च ॥ दुष्टक्षणाः कुलिककंटककालवे
लाः स्युश्चार्धयामयमघंटगताः कलांशाः ॥ १४ ॥ रविवासवासरेषु सप्तमाष्टमदशमचतुर्दशसंख्यामुहूर्त्ताः निं
द्याः ॥ बुधे द्विचतुरष्टनवमदशचतुर्दशसंख्यामुहूर्त्ता निंद्याः ॥ शनौ एकद्विवसुदशैकादशसंख्याकामुहूर्त्ता निं
द्याः ॥ एषु मुहूर्त्तेषु चित्तदुष्टक्षणो दुर्मुहूर्त्तो ज्ञेयः ॥ केषुचित्कुलिककंटककालवेलास्युः केषुचिदर्धयामयमघं
टास्युः तत्क्रमाण्माह कलांशा इति ॥ कलांशाः षोडशांशाः दिनस्येति शेषः ॥ यस्मिन् दिने कुलिकादिर्जातः सा
तद्दिनेयद्दिनमानं तत्षोडशांशान्निर्भाज्यं ॥ फलं यद्घटीपलात्मकं तन्मुहूर्त्तपरिमाणं तेषुमुहूर्त्तेष्वयोदोषाज्ञातव्यः ॥
तथा हि रवौ चतुर्दशसंख्यो मुहूर्त्तो दुर्मुहूर्त्तः कुलिकश्चाष्टमः कंटकसंज्ञः ॥ सप्तमाष्टमावर्द्धयामसंख्यौ तत्रा
ष्टमः कालवेलाख्यश्च दशमो यमघंटाख्यः ॥ एवं सोमवारादिष्वपि बोद्धव्यं तत्र कुलिककंटककालवेलाय
मघंटज्ञानं पूर्वश्लोके स्मधायि दुर्मुहूर्त्तार्द्धयामान् विवाहप्रकरणे रवावर्यमेत्यादिना वक्ष्यति ॥ ननु दुर्मुहूर्त्तकु

मु० टी०
६३९

लिकादेर्कर्चेनिकस्यार्थस्यस्पष्टयेषट्स्वरेत्यादिना धुमकारेनाभिधानात्पूर्वपरस्तात्पुनर्ग्रंथोक्तप्रकाराभिधान
मयुक्तं प्रतिज्ञातिनिषियेदृष्टंतार्थमभिधानंतथाहिग्रंथेषुगुर्सुहृतेकुलिकं कंटककालवेलाईयामयमघंटानां
श्लोकाषट्केनाभिधानाघ्यारव्यानगम्यर्थत्वाच्चेतिगौरवं॥ अत्रतुसर्वेसप्यर्थंग्राहृतःसंक्षिप्तश्लोकद्वयेनव्याख्या
नानपेक्षिमभिधानमिति लाघवमिति।दृष्टांता।दृष्टिंतिवारासर्वत्रला
घवकरणास्त्वतार्थंत्रिगणपामत्रग्रंथेपठनादर्शीतिः शायार्थेचपुनरु
क्तिः ३९॥ अथविवाहादिशुभकृत्येहालिकानिषेधमनुष्टुभाहविपा
शेरावतीरेशातद्वाश्चत्रिपुष्करेतिरे॥विवाहादिशुभेनेष्टंहोलिकाप्राग्दि
नाष्टकं।४०॥विपाशानदीइरावतीदेशेषुतयाश्चेतेनयौपश्चिमदेशेऽ
प्रसिधे।एतयोर्नद्योस्तीरेतीरेवर्तदेशेषुतथाशातद्रूर्नदीसापातत्रैवप्र

वारः	सू	चं	मं	बु	गु	शु	श
कुलीक	१४	१२	१०	८	६	४	२
कंटकः	६	४	२	१४	१२	१०	८
कालः	८	६	४	२	१४	१२	१०
उपलग्नः	१४	१२	४ १०	६ ७	८ ७	४ ५	१ २
यामार्द्ध	७ ८	१३ १४	४ ३	९ १०	१६ १५	६ ५	११ ११
यमघं०	१०	८	६	४	२	१४	१२

सिधावस्याश्चपितीरवर्तदेशेषुतथात्रि

राम०
३९

पुष्करारव्ये देव्योश्च होलिका फाल्गुनि दाहः ततः प्राक् दिनाष्टकं विवाहादिशुभकृत्ये ष्टं निषिद्धमित्यर्थः ॥ अत्र चैता
वद्धोलिकाष्टनिषेधः ॥ श्रीबोधेऽप्युक्तं ॥ अष्टमी समारभ्य फाल्गुन्यस्य दिनाष्टकं पूर्णिमावधिकं त्याज्यं होलाष्टकमि
दं शुभेऽस्यापवादोऽपि तत्रैव ज्ञातव्यः ॥ विपाशैरावत्यां त्रिपुष्करे ॥ होलाष्टकं विवाहादौ शोभनं त्याज्यमि
तिमन्यत्र ॥ अथ यस्तत्पुनरस्तीनां दुष्टयोगानां परिहारमनुष्टुभाह ॥ अस्तु क्रकचदग्धादीनी दोषास्ते शुभा जगु
ः केचिद्यामोत्तरं चान्ये यात्रामेव विनिंदितान ॥ ४ ॥ अस्तु वोऽस्तु योगा आनंदादिष्वष्टाविंशतियोगेषु दास्त्रादय
इत्यादिना प्रागुक्ताः ॥ क्रकचाः षष्ठ्यादितिथियोगं त्रयोदशिलोममित्युक्ताः दग्धायोगाः ॥ सूर्येशपंचाग्निरसाष्टनंद इ
त्युक्ताः आदिशब्देन विषयोगा हुताशनयोगाश्च गृह्यंते ॥ चंद्रे शस्ते सम्यग्बलेन सति सम्यक्त्वेन संगोचरप्रकरणे व
क्ष्यते ॥ अस्तु क्रकचदग्धादीन् शुभान् अनिष्टफलमपास्य शुभफलदान् ॥ अथ जगुरुक्तवंतः यदाहुः राजमार्तं
डः क्रकचास्तु योगाः स्वाः दिनं दग्धं तथैव च ॥ चंद्रे शुभे नेष्टमयं यांतीति दृष्ट्वा व्याहताइव केचिदाचार्याः अर्थं

मु॰ टी॰ ४०

ल ल: अयोगेषु च सर्वेषु वर्जयेत् परिकाद्वयं उत्पातमृत्युकाणाना पंच षष्ठ सप्त यत्र लग्न विनाकिंचित् क्रियते शुभ संज्ञके नत्रलेषांत योगानां नाडिका: प्रेष्माणोऽडा पते फलं

यामो न्तरं प्रहरो न्तरं क कचघ॥ चाद्दीपिकायां राजमार्त्तंड: उत्पाते यमघंटे च काणे च क्रकचे तथा। तिथो द

ग्धे च कालेष्व प्राप्यामात्परत: शुभमिति॥ अथान्ये आचार्य मित्युक्तक्रकचदग्धादीन् यात्रायामेव निंदितान् ज

गु: विवाहादौ निषेधाभावाद्व्यपकार्याणि॥ यदाह लल्ल॥ वार र्क्षतिथियोगेषु यात्रामेव विवर्जयेत्॥ ४१॥

अथ पुनरप्यपवादं भुजंगप्रयातेनाह॥ अयोगे सुयोगोऽपि चेत्स्यात्तदानीम योगं निहत्यैष सिद्धिं तनोति॥

परे लग्नशुध्या कुयोगादिनाशं दिनार्धोत्तरं विप्रपूर्वं प्रशस्तं॥ ४२॥ अयोगे सुयोगोऽपि चेत्स्यात्तदा रावसिरयोग:

अयोगे मयोगफलं निहत्य सिद्धिं तनोति कार्यसिद्धिं विधास्यतीत्यर्थ:। यदाह राजमार्त्तंड:। अयोग: सियोगश्च

द्वावेतौ भवतो यदि॥ अयोगो हन्यते ताभ्यां सिद्धियोग: प्रवर्तते॥ अन्यच्च हंत्यमृताख्यो योगा: सर्वाण्यपशु

भानिजतानियानियनं भवति पुरन्नरिल राक्रोवेध्वति विविष्टिव्यती पातो दिनं वाप्यशुभं न भवेत्। हस्ते स्व

त यो स्वतयोग नन्नास्करे एतमो यथेति॥ तदस्त तयोगस्य स्याति प्रा राज्यस्य स्वनार्थनतु न जायती पा रा॰ म॰ ४०

तादिदोषापवादकं हंत्यमृताख्योयोग इत्येकवाक्यताबलात् अथ परे आचार्यालग्नशुध्यासमावीनलग्न
बलेनकुयोगानांमस्तुककवादीनांनाशंवदंतीतिशेषः॥यद्दाहुस्सएवयत्नलग्नंविनाकर्मक्रियतेशुभ
संज्ञकं॥तत्रतेषामयोगानांप्रभावाज्जायतेफलं॥अथावश्यकशुभकृत्येकालांतरस्मृतीहायोगिता
यांपरिहारमाहविष्टिपूर्वेविष्टिमन्ज्ञातत्पूर्वंनक्षत्रतापादिकंदिनार्धोत्तरंमध्याह्नादनंतरंशास्त्रमाहुः अ
र्थनज्ञानिषिद्धेतिपूर्वमुक्तंतदधुनाप्रस्तावात्त्रिषिद्धकालंशालिनीछंदसाह।शुक्केपूर्वार्धेष्टमीपं
चदश्योर्नैकादश्यांचतुर्थ्यापरार्धे॥कृष्णेंत्यार्धेस्यात्ततीयादशम्योः पूर्वेभागेसप्तमीशंभुतिथ्योः॥४३॥शुक्लपक्षे
ततीयायांदशम्यांचांत्यार्धेउत्तरार्धेभद्रास्यात्सप्तम्यांशंभुतिथौचतुर्दश्यांचपूर्वेभागेपूर्वार्धेभद्रास्यात्॥
पूर्वेइति॥पूर्वादिमोनवम्योवेतिस्मित्रमावपक्षेस्तुपंचम्यादीनांतिथीनांगतभोग्यघटिकायोगार्धेनभद्राप्रमा
णमितियावत्तिथ्यर्गतैष्यैकदलंतत्स्मानंकरणंवैनेदितिचोन्नेदितिचोपदेश्योक्तेः हिप्ण्यर्धेभागंसर्वेषांकर
स्पार्धे

मु॰टी॰ ४१ रणानांप्रकल्पयेदिति। सूर्यसिद्धांतोक्तेश्च॥ उक्तंचदीपिकायांतृतीयादशमेशेषेतत्पंचम्योस्तुपूर्वतःकृ
ष्णेविष्टिसितेतद्वत्तासांपरतिथिष्वपि॥ बृहस्पतितातुस्पष्टमुक्तंसितेचतुर्थ्यामंत्यार्धमाष्टम्यामाद्यार्धमेवच
॥एकादश्यांपरार्धंतुपूर्वार्धंपूर्णिमातिथौ॥ कृष्णेतृतीयांत्यार्धेहिसप्तम्याःपूर्वार्धमेवचदशम्यामुत्तरार्धे
तुर्दश्यपर्धमादितः॥ विष्टाख्योयंमहादोषःकथितोत्रसमस्तगः॥ नष्टानीकृतत्स्वकर्मककर्तासहविनश्यती
ति। हरिशयनीतगोपूर्णिमायांसन्नकोशेप्रत्येकंनक्षत्रनामानि॥ हंसीनंदिन्यपिचत्रिशरा॥ सुमुखीकरालिका
चैवविकृतास्तिरौद्रमुखावचतुर्मुखाविष्टयःक्रमशःचतुर्थ्यादितिसंबंधिनक्षत्रनामानिधान्नतातामसादशे
नफलतारतम्यमस्तस्वनाथेनडास्वरूपंरत्नमालायां॥ उक्तंवेदेष्वतयिंडिकातिरुष्याद्देष्ट्राप्यघुहतुगंदी रामः
र्घनासाकार्यमशोहृत्तवहलजंसुद्भिरंतिविश्वांतःपततिसमंततोत्राविष्टिरिति॥४३॥ अथचतुर्थ्यादिति ४१
थिषुनक्षत्रायामुखपुच्छविभागादिकंशार्दूलविक्रीडितेनाह। पंचद्व्यद्रिकृताष्टरामरसभूयामादिघ्नः

न्नापाविष्टेरास्पमसग्दजेंदुरस्परामाद्यस्थिवाणाध्विषुयासिष्वंत्यघटीत्रायंभुनकरंपुच्छंतथावासरेविशिष्टि
ष्यपराध्येजाभुनकरागरात्रौतुपूर्वाधजा४४॥ चतुर्थ्यादितिथीतांक्रमतः पंचादिप्रकारेषुशिरः पंचनाड्यः॥
आदिमाविष्टेर्भज्ञयाआस्यमुखं॥ यथाचतुर्थ्यः पंचमप्रहरआदिभूताः पंचघटीनक्रमुखं॥ एवमष्टम्या॰
द्वितीयप्रहरणेएकादश्यपः॥ सप्तमप्रहरेचतुर्दश्यपा अथप्रहरेनक्रमुखमित्यर्थः॥ तन्नाड्यामुखंत्र्यसम्भ्र
नमित्यर्थः॥ अथपुनश्चतुर्थ्यादितितिथिनांक्रमेणगजादिप्रहरेषु॥ त्र्यंत्यंत्र्यंत्येनववमंत्यादिगादिभ्योय
द्वितियत॥ घतित्रयंपुच्छंपुच्छेसंज्ञंतत्भुनकरंसमस्तकार्येष्वेत्यर्थः॥ यथाचतुर्थ्याः अष्टम्यप्रहरस्यांत्यघ
टीत्रयंनक्रपुच्छंएवमष्टम्यःप्रथमप्रहरस्यएकादश्यपःषष्ठप्रहरस्यपूर्णिमायात्ततीयप्रहरतायाःसप्त
मप्रहरस्यसप्तम्याःद्वितीयप्रहरस्यदशम्याः पंचम्याप्रहरस्यचतुर्दश्याश्चतुर्थप्रहरस्यांत्यघटीत्रयं
नक्रपुच्छमित्यर्थः यदाहगुरुः॥ भूतदस्त्रेसुरावोधिवसुवर्कांगरूपकाः॥ यामेष्वेषुक्रमादास्यमवेक्षिय

मु॰ दी॰ र्दैविष्टिस्थितिर्व्यवहारसमुच्चये॥ दशम्यामष्टम्यां प्रथमघटिकापंचकहरं प्रहरं हरिपुस – म्यां द्विरशघटि
४२ कांतत्रीयाराकायांस्वयमखघटिकास्य॥ परस्त्वंपुच्छंनविष्टेःपुच्छंतिघटिस्त्री वेचतुर्थ्यस्तुविरमेदितिद्विरेका
दशीरापूर्णिमानतुदेवतेत्यत्तियायते॥ तस्याःपुच्छं कथनाशुपस्तुत्वसिधिर्दैत्यपतेर्देवताद्व कुर्यंपस्तुर्न
वितुमर्हति॥ सत्यंदैत्ये दैवेषुपराजितेषुरुद्रघ्यज्वालाकुलनेत्रालोकितशारीराद्दैवीनजासंज्ञासुखपु
च्छादिमन्युत्पन्नातीदैत्यान्जघान॥ यदुक्तंश्रीपतिना॥ दैत्येंद्रःसमरेशरेसुविजितेभ्धीशःक्रुध्यारूष
वान्त्वकायंकिलतिर्गताखरमुखीलांगूलनीचत्रपातविष्टिःसप्तानुजात्वगेंद्रगलिकाह्यामोदराप्रेतगा राम॰
॥दैत्यध्नीमुदितेसुकरणप्रांतेनियुक्तासदैति॥ करणान्याहगर्गः॥ – बवंबालवंचैवकौलवंतैतिलं ४२
गरं। वणिजंविष्टिमित्याहुः करणानिचराणितु॥ विष्टिर्नज्ञान्तीकृष्णाचतुर्दश्यपाः शकुनिर्दर्श
भागयोःनवेच्चतुष्पदंनागंकिंस्तुघ्नंप्रतिपःदलो॥ अतस्तिथ्यर्धभोगाःकरणमित्युक्तेःप्रतिप्रत्तुर्वा

र्द्धे स्थिरकरणं किंस्तुघ्नं ततो बवकरणं प्रतिपद्द्वितीयार्धे बालवकौलवकरणे द्वितीयायां ॥ पूर्वोत्तरा
र्धयोः तैतिलगरणे तृतीयार्धयोः ॥ चतुर्थ्यां पूर्वार्द्धे वणिक् ॥ उत्तरार्धे तु भद्रा एवं पंचमीषष्ठीसप्तमीषु बवबा
लवकौलवतैतिलगरवणिक्करणानि भवंति ततोष्टम्यापूर्वार्द्धेन भद्रा भवति ॥ एवं पुनः प्रवृत्तावुक्ततिथिषु भ
द्रा ज्ञेया अंतरा वोक्तमुक्तं पूर्वार्धे अष्टमीपंचदश्योरित्यादि ॥ एवं चतुर्दश्याः पूर्वार्द्धे भद्रा उत्तरार्धे दर्श
शाकुन्यादीनि स्थिरकरणानि चत्वारि ॥ तत्र शास्त्रमाह ॥ वसिष्ठः ॥ वसिष्ठः ॥ वधबंधविषयः विषाग्न्यस्त्रच्छे
दनोच्चाटनादि पतत् ॥ तुरंगमहिषोष्ट्रादिकर्म विष्ट्यां तु सिध्यति न कुर्यान्मंगलं विष्ट्यां जीवितार्थी कदाचन ॥ कु
र्वन्नज्ञः स्ततः क्षिप्रं तत्सर्वं नाशतां व्रजेत् ॥ तत्रांगविभागः फलं च कश्यपसंहितायां मुखे पंच गले त्वेका वक्ष
स्येकादश पादस्तता नाभिश्चतस्रः षट्कट्यां तिस्रः पुच्छे तु नाडिकाः ॥ कार्यहानिर्मुखे मृत्युर्गले वक्षसि निः
स्वता ॥ कट्यां उन्मत्तता नाभौ च्युतिः पुच्छे ध्रुवो जयः ॥ अयं च मध्यमांगविभागो ताडीनां त्रिंशत्तोक्तः त्रिंशतो न्यू

मु॰टी॰ ४३ नाधिकत्वेतु त्रैराशिकेन मुखादीनामंगानां विभागज्ञानं यथा यदीनाडीत्रिंशता इष्टमुक्तं। अंगपरिमाणं
तदेष्टपरिमाणेन किंमिति। त्रैराशिकं एवं सति उक्तांगपरिमाणं जन्मनोगमितघटीभिः संगुण्यं त्रिंशता
नाज्यं लब्धं सप्तांगविभागः। त्रैराशिकस्वरूपं तु लीलावत्यामुक्तं॥ प्रमाणमिच्छा च समानजाती आद्यंत
योस्तत्फलमन्यजाति। मध्येतदिच्छाहतमाद्यहृत्स्यादिच्छाफलं व्यस्तविधिर्विलोमे इति। तत्र मुखादिका
लोरहमालायां जलनिधिरविशशिरशः शार्वकीनाशवायुः त्रिदशपतिककुब्भः प्रोक्तमास्यंद्विविन्निराश
संख्यायामक्रमेण। स्फुटमिहार्यमंगले श्वेतदेवा जलं वरुणः कीनाशो यमः मुख्यश्चतुर्दश्या उत्तरार्धे पश्चि राम॰
मदिशि नक्रमुखं तथा शसंख्यायामक्रमेण पंचमे भनवति॥ अर्थादेवनजायः प्रसन्वेतुष्टयाधिकास्थि ४३
त्पन्नावारं तेएवघटिन्नयंपुष्ठं। ततोष्टम्यांष्ठितीयप्रहरे तेन प्रकारेण आग्नेय्यां दिशि मुखं मुखाद्यप्रा
कपुष्ठेमिति प्रथमप्रहरांतरावपुष्ठं प्रहरं त्राघटिकं मित्येवं सर्वास्वपि नजातिथिष्वगंतव्यमप्रयोज

नमपि॥ तत्रैव मनुवसुमुनितिथियुगदशाशिवगुणसंख्यासु तिथिषु पूर्वस्याः॥ आयाति विष्टिरेखा ट
ष्टिशुभनदापुरस्त्वशुभा॥ तदेतदात्ययककार्यसंनवेसति मुखादिकं मुखयात्रानिषेधकमधेयं। ग्रंथां
तरेऽन्यदप्युक्तं असिते सर्प्पिणी ज्ञेया सिते वृश्चिसुवृश्चिकी सर्पिण्यास्तु मुखं त्याज्यं वृश्चिकाः पुच्छ-
मेव च॥ अथ परिहारमाहत्येति विष्टिस्तिथ्यपरार्द्धजा शुक्लरात्र्यर्धसंभूता वासरे दिवसे यदि सा त
दाशुभकरी॥ तथा तेनैव प्रकारेण तिथिपूर्वार्धजा नक्तं रात्रौ चेत्तदा शुभकरा स्यात्। उक्तं च। रात्रौ
नक्तं यदा विष्टिः स्याद्दिवा नक्तं निशि॥ न तत्र नक्तं दोषा स्यात् सा नक्तं दायिनीति॥ रात्रिनक्तं तिथ्युत्तरार्धो
ऽवादिवानक्तं तिथिपूर्वार्धेऽवाऽशुभमर्थमेवाह गुरुः निशि पूर्वार्द्धजा विष्टिः दिवा चापरतः शुभा
क्रमागतः तु या विष्टिः सेव शालाहलोपमेति॥ लल्लेपि दिवापरार्द्धजा विष्टिः पूर्वार्धोत्थाय रात्रिशि
नदा विष्टिः शुभायेति कमलासनभाविता अत्र सिधांतेपि दिवापरार्धजा विष्टिरपि विष्टिर्विष्टिरेव-

मु. दी. दिवानिशिसात्म्याज्ज्ञात्वन्यथाविष्टिःसर्वकर्मसुशुभप्रदा॥ ननुयच्छुनारदकश्यपादिभिःरुक्तंकरणा
४४ तिवच्चादीनिशुभंसंज्ञानितानिषट्॥ क्रमायाताक्रमायातांविष्टिंत्यजेतुमंगले। अत्रक्रमायातादि
वारात्रिक्रमविभागता॥ अक्रमायातादिवानक्तंरात्रौरात्रि॥३॥ नक्तंचदिवेत्यर्थः। एवंसतिद्वैवि
ध्यायाअपिनक्तंराग्निधानंअयुक्तंउच्यतेइदमेवाक्रमायाताइतिवचनंज्ञापकमुक्तार्थस्यअन्यथा
साम्यतोनक्तंतुशस्तुक्तोर्थविधिनायादोषवत्वसिद्धेरनर्थकमिदंस्यात्॥ तस्मात्शुभकार्याणिनक्तं
रूपदुष्टदिनव्यतिरिक्तकालप्रतीक्षायोग्यत्वेतद्दैवकार्यंनदुष्टदिनेअबाधेनोपपन्नोबाधोनन्याया राम:
त्॥ वचनस्यनिषेधएवतात्पर्यात्। अत्रावश्यकर्तव्यस्यशुभकर्मणःकालांतरप्रतीक्षासत्व ४४
मानस्यैवमादिपरिहारमाश्रित्यदुष्टदिनेकृतिश्चेत्तिर्हितेवविष्टिरंकारकश्चैवेत्यादिपरिहार॥
एतस्यारएवेत्यलंपल्लवितेन॥४४॥ अथनक्तनिवासंतत्फलंचानुष्टुभाहाकुंभनककर्कमयेम

र्त्ये स्वर्गोमर्त्ये ज्वेजात्रये लिंगे। स्त्री धनुर्जुकनक्रोधो भद्रा तत्रैव तत्फलं॥४५॥ अत्र चंद्रमसि कुंभेव
ये कुंभमीनस्योः कर्कद्वये कर्कसिंहराश्योः स्थिते सति भद्रा मर्त्ये मनुष्यलोके तिष्ठति॥ अथ मेषात्त्रये मे
षवृषमिथुनास्थिते लिंगे वृश्चिकास्थिकास्थिते च चंद्रे स्वर्गलोके भद्रा तिष्ठति अथ भद्रा तत्रैव मर्त्यस्वर्गपा
तालेषु फलं स्योक्त शुभाशुभफलं ददाति स्वपवादद्वारा प्रयोजनमुक्तं भवति॥ उक्तं च॥ मेषोक्षकोर्प्य
मिथुनेषु दिसिंहमीनकर्केषु चापमृगतौलिसुतासु चंद्रे स्वर्गमर्त्यनागरीः क्रमशः प्रयाति विष्टिः फलान्य
पि ददाति हीनत्र देहेशोइति। भूपालवल्लभेपि॥ कन्यातुलामकरधन्विषु नागलोके मेषालिवेणिकवृषेषु
सुरालये स्यात्॥ पाठीनसिंहघटकर्केषु मर्त्ये चंद्रे वदंति मुनयस्त्रिविधां हि विष्टिमिति। पाठीनो मीन
ः। एवं महताग्रंथसंदर्भेण पंचांगदूषणमुक्त्वातिधुना कालाशुद्धोनिषीध्य वस्त्वति शार्दूलविक्रीडिता
भ्यामाह॥ वाप्यारामतडागकूपभवनारंभप्रतिष्ठेव्रतारंभोत्सर्गवधूप्रवेशनमहादानानि सोमाष्टक।

र्त्ये स्वर्गो मर्त्ये ज्वेजा आये लिंगे । स्त्री धनुर्जुकनक्रो धोमनश्रातत्रैवतत्फलं ॥४५॥ अत्रैवं द्वसमसि कुंभेव
येकुंभमीनस्यो कर्कद्वये कर्कसिंहराशिस्थिते सति मनश्रामर्त्ये मनुष्ये लोके तिष्ठति ॥ अथमेषात्रयेमे-
षवृषमिथुनास्थिते लिंगे वृश्चिकास्थिकास्थिते चचंद्रे स्वर्गलोके मनश्रातिष्ठति अथ मनश्रातत्रैव मर्त्यस्वर्गपा
तालेषु फलं स्योक्तशुभाशुभफलं ददाति त्सपवाद द्वारा प्रयोजनमुक्तं भवति ॥ उक्तं च ॥ मेषोक्षकोप्य
मिथुने घटसिंहमीनकर्केषु चापमृगतौलिसुतासु चंद्रे स्वर्गमर्त्यनागरीः क्रमशः प्रयाति विधिः फलान्य-
पि ददाति हीनत्रदेशेइति । भूपालवल्लभेपि ॥ कन्यानुलामकरधन्विषु नागलोके मेषालिवेणिकवृषेषु
सुरालयेस्यात् ॥ पाठीनसिंहघटकर्केषु मर्त्ये चंद्रे वदंति मुनयस्त्रिविधोदिविष्टमिति । पाठीनो मीन
ः एवं महताग्रंथसंदर्भेण पंचांगभूषणं मुक्तातिधुना कालाशुद्धोतिषीध्यवस्तुतिशार्दूलविक्रीडिता
भ्यामाह ॥ वाप्यारामतडागकूपनवनारंभप्रतिष्ठेव्रतारंभो स्सर्गवधूप्रवेशनमहादानानि सोमाष्टक ।

मु·दी· गोदानाग्रयणप्रपाप्रथमकोपाकर्मवेदव्रतंतैलोदारुमयातिपत्रशिशुसंस्कारःसुरस्यापनं॥४६॥दीक्षा
४५ मौंजीविवाहमुंडनमपूर्वदेवतीर्थेक्षणंसंन्याससाग्निपरिग्रहौनृपतिसंदर्शनाभिषेकौगमं॥चातुर्मास्यस
माप्तीश्रवणयोर्वेधेपरिज्ञात्पजेकृत्वास्तशिशुत्वईज्यसुतयोन्यूनाधिमासेतथा॥४७॥वापीदीर्घिका
॥आरामउपवनंतडागःपुष्करणीकूपःप्रसिद्धःभवनंगृहंएतेषांआरंभप्रतिष्टे॥आरंभोनिर्माणंप्रतिष्टा
उत्सर्गः॥तत्रगृहप्रतिष्टागृहप्रवेशोज्ञेयः॥व्रतारंभोत्सर्गौव्रतानामनंतशिवरात्रिव्रतादीनामारंभः॥उ
त्सर्गेनंतव्रतादीनांउद्यापनं॥महादानानितिसोमःसोमयागः॥अष्टकाअष्टकाश्राद्धंगोदानंकेशांतसंज्ञं
कर्म॥आग्रयणंतवान्नेष्टिःप्रपाजलदानप्रपापानीयशालिकेत्यभिधानात्॥महाराहूःपक्षेइतिवदंति॥ रामः१
पक्षत्राइतिकान्यकुब्जःप्रथमकोपाकर्मप्रथमारभ्यमाणश्रावणीकर्मवेदव्रतंमहानाम्न्यादित्रयंउप ४५
निषद्व्रतंमहानाम्नीव्रतंवेदव्रतंत्वनीलोद्वाहनीलदराहृवाख्यः॥काम्योवृषोत्सर्गःनन्वेकादशाहेत्रियम

णाः। तस्मात्देवविहितत्वान्मुहूर्त्तविचारानुमेषः॥ अतिपन्नशिशुसंस्कारः अतिपन्नाः अतिक्रांताजातातकर्म
नामकर्मादयः शिशूनां बालानां संस्कारः दीक्षामंत्रग्रहणाधिकामुंडनचौलं॥ अपूर्वदेवेक्षणं तीर्थेक्षणं
च॥ अग्निग्निपरिग्रहोग्निहोत्रं चातुर्मास्यं चातुर्मास्याख्योयोगः समावर्तनं मौंजीमोक्षः श्रवणयोर्वेधः कर्णयो
र्वेधः कैधः परीक्षीतसमासादिरूपादित्वमितियायत्। अन्यानिकर्माणिनामतः स्पष्टानि एतानिसर्वाणि
कर्माणित्यजेत्नकुर्यात्। कदाइज्यसितयोर्बृहस्पतिशुक्रयोर्वृद्धत्वे अस्तत्वे शिशुत्वेवा सिंहेचतथान्यूना
धिमासे क्षयमासे अधिकमासेचनकुर्यात्॥ अयंचनिषेधः प्रथमोपक्रांनकर्मसुनतुनित्यवदादरध्ध्वा
र्षिकांयात्रादौ। अत्रमूलवचनालिख्यंते॥ तत्रशुक्रास्तादिषुज्योतिसारसागरे अंहसोचयावाधिकूपत
डागयानगमनं क्षौरप्रतिष्ठाव्रतं विद्यामंदिरकर्णवेधनमहादानंवनंसेवनं। तीर्थस्नानविवाहदेवनवं
मंत्रादिदेवेक्षणं। दूरेणैववर्जिजिषुविपरिहरेद्दस्तंगते नार्गवो बालेशुक्रेवृद्धेजीवेवृधेजावे बालेजीवेसिं

मु॰ टी॰ ४६ हेसिंहादिज्येजीवादौत्येनष्टेजीषेतथामलिम्लुचेमासिसुरम्बाचार्योगेतिथास्तगो।वापीकूपतडागादिक्रि
याःप्रागुदितास्त्यजेदिति॥वनमारामादि॥सेवनंराजादीनां।नष्टेजीवेनष्टबलेनीचस्थितेगुरौइत्यर्थः॥ल
ग्नः।उपनयनेगोदानंपरिणयनेगृहप्रवेशगमनि अस्तमितेषुनकुर्यात्सुरगुरुभृगुपुत्रचंद्रेषुगातान
यःअस्तंगतेगुरौभृगौकेबालेवृद्धेमलिम्लुचे।उद्यापनमुपारंभंव्रतानांनैवकारयेत्अस्तमयादिफलमा
ह॥वादरायणः।गुरोर्हस्तेपतिंहन्यात्शुक्रास्तेचैवकन्यकां।चंद्रेनष्टेउभौहन्यात्तस्माद्स्तंविवर्जयेत्
।विवाहइतिशेषः।बालभावेस्त्रियंहन्यात्वृद्धभावेनरंतथा।तस्माद्बाल्येवार्धकेचविवाहंनकारयेत्॥उपल रामः॰
क्षणमेतत्।एवंव्रतबंधादिष्वपिकर्तुर्मरणंज्ञेयं।एकत्रनिर्णीतःशास्त्रार्थोपरत्रापिविवित्तियुज्यतइ ४६
तिन्यायात्।उक्तंचशाङ्र्गीयविवाहपटले।विवाहोव्रतबंधोवायात्रावागृहकर्मसुगुरावस्तमितेशुक्रे
ऽकवेसत्सुविनिर्दिशेत्॥अथाधिमासक्षयमासवर्ज्यानि।तत्रगृह्यपरिशिष्टेसोमयागादिकर्माणि

न्यान्यपिमलिम्लुचे।तथैवाग्रायणाधानचातुर्मास्यादिकान्यपि॥महालयाष्टकाश्राद्धोपाकर्माद्यपिकर्मयत्।
स्पष्टमासविशेषाख्याविहितंवर्जयेन्मले।गार्ग्यः।गृहस्थैस्समतीतेअपि॥अग्न्याधानंप्रतिष्ठांचयज्ञदानव्रतानिच
।वेदव्रतवृषोत्सर्गचूडाकरणमेखला।मांगल्यमभिषेकंचमलमासेविवर्जयेत्मरीचिः।गृहप्रवेशगोदा
नस्नानाश्रयमहोत्सवान्।नकुर्यान्मलमासेतुसंसर्पोपिबृहस्पतौतथा।यदाक्षयमासोभवतिं।तदापूर्वोत्तरावधि
मासोभवतः।तत्रपूर्वःसंसर्पःद्वितीयोंहस्पतिः।एतान्यधिकमासक्षयमासवर्ज्यानिगुरुशुक्रयोरस्तादावपि
वर्ज्यानि।यदाहवृद्धगार्ग्यः।बालेवायदिवावृद्धेशुक्रेवास्तंगतेगुरौ।मलमासइवैतानिवर्जयेद्देवदर्शनं।अत्रदे
वदर्शनमपूर्वविवक्षितं॥यदाहगार्ग्यःअपूर्वदेवतादृष्टाशुचःस्युर्नष्टभार्गवे।मलमासेयन्नादृष्टतीर्थयात्रां
परित्यजेत्॥अनादृष्टतीर्थयात्रामपूर्वतीर्थयात्रांदीपिकानेपिशुक्रास्तेष्टमर्क्षेगुरुसंहितरवौजन्ममासेष्ट
म्पेदैविशेमासेमलात्स्वेकुजशनिदिवसेजन्मतारासुवाथ।नाडीनक्षत्रहीनेसुरगुरुरजनीनाथताराविं

मु॰टी॰ शुद्धौप्रातःकार्यःपरीक्षादितुचरस्थहांशे।दयेद्यास्तलग्नेइति।।गुरुसदितरयोर्गुर्वादित्येइत्यर्थः।इदंसिंहस्थि
४१ तमकरस्थितासितगुरूरूणामुपलक्षणं।जरूकंचव्यवहारोद्द्येयेसिंहस्थेमकरस्थेवाजीवेवाजीवेचास्तमितेत
था।मलमासेनकर्तव्यापदिश्चाजयकोक्तिरणीत।मलमासग्रहणं।क्षय॰मासस्याप्युपलक्षणंनादिन
क्षत्राणिवैनाशिकक्षत्राणिपरीक्षादिवंश्रयमत्रातात्पर्यार्थः।।अनियतकालविहितानिचूडाकरणवा
प्यारामादिशुभकृत्यानिगुर्वादेरस्तादिषुसर्वथानकार्याणियानि।यत्तुनियतकालानिसीमंतनामकरण
दीनितानिगुर्वादेरस्तादिसत्वेपिस्वोक्तकालएवभवंति।।चतुर्थेगर्भमासेस्यात्सीमंतोन्नयनक्रियाषिष्टेष्मे रामः॰
वाकुर्वीतसद्योंतरविधानतःइति।शौनकादिषुमुनिवचनेभ्यःस्पः कालस्यापिनियामकत्वावगतेः।अतए ४१
वाहस्त्रहस्पातिः।मासमप्युक्तकार्येषुमृतत्वंगुरुभृकयोः।।नदोषकृन्मलोमासोगुर्वादित्यादिकंतथायमोपि
चंद्रसूर्यग्रहेस्नानेश्राद्धध्यानजपादिकंकार्याणिमलमासेपिनित्यंनैमित्तिकंतथेति।।अन्यत्रापि।सीमं

त जातकादीनि प्राशनांतानि वै। न दोषो मलमासस्य मौढ्यस्य गुरुशुक्रयोः॥ एवं सति प्रतिबंधवशादतिक्रांतका
लेषु जातकर्मादिषु सत्सु गौणकाले कार्या। तद्गौणेन सद्यस्सन्मुहूर्तोपलब्धौ बहुदिवसगणास्सन्मुहूर्तोपलब्धि
वो विहिता गौणकालस्य तु स्वत्वात्। तदुक्तं वसिष्ठेन। अतीतकालान्यखिलान्यतीनी। कार्याणि सौम्यायन
गे दिने शुभे। सिते गुरौ वाप्यथ दृश्यमाने तदुक्तपंचांगदिने प्रशस्ते इति। अत एवोक्तं॥ अतिपन्नास्त्रिशु
संस्कारा इति॥ ४७॥ अथ सिंहस्थगुर्वादिदोषानुद्धालिन्याह॥ अस्तिवर्ज्यं सिंहनक्रस्थनीचवर्ज्यं के
विरुक्रगे चातिचारे। गुर्वादित्ये विश्वघस्रेपि यहे प्रोक्तं सत्सु दंतरशादिनूषां॥ ४८॥ यदस्ते गुर्वादेरस्तेव
र्ज्यमुक्तं। तत्र सिंहतक्रस्य जीवे सिंहस्थगुरौ मकरस्थगुरौ च वर्ज्यं निषिद्धं पदाह वराहः। उद्यानवृतव्र
धदीक्षाविवाहयात्रादि वधूप्रवेशाः॥ तडागकोपत्रिदशप्रतिष्ठा बृहस्पतौ सिंहगते न कुर्यात्। दैवी
पुराणेपि। सिंहसंस्थे गुरौ यत्नात्सावरिमान्विवर्जयेत्॥ प्रारब्धं न सिध्येत महाभयकरं भवेत् पुत्रनाशात्

मु॰ ची॰ करत्राणि हन्याच्छीघ्रं न संशयः॥ कारको व्रजते नाशं संतातंम्रियते चिरात्। मारध्वं न च सिध्येत महान् वेत्
४८ ॥ देवारामतडागाश्च प्रपोद्यानगृहाणि च॥ विवाहश्चोपनयश्चूडादिकं न सिध्यति॥ यथा सिंहस्थितो जीवस्तथै
वमकरस्थितः त्रिस्थलीसेतौ गुर्वादित्ये गुरौ सिंहे सुत्रे वास्तमुपागते। ज्यजेष्ठानं महादानं व्रतं देवविलोकनं
मिति। लल्लोपि। नीचस्थे वक्रसंस्थेप्यतिचरणगते वा बालवृद्धेस्तगे वा संन्यासो देवयात्राव्रतनियमविधिः व
र्णकं दस्तुदीक्षा व्रतनियमवियमविधिः वर्णकं दस्तुदीक्षा। मौंजीबंधोंगनानां परिणयनविधिः वास्तुदेव
प्रतिष्ठा वर्ज्याः सद्भिः प्रयत्नात्त्रित्रिदशतिगुरौ सिंहराशिं हराशि स्थिते वा। अयमपि नियतकालवितानां न रामः॰
भवति। उक्तं च शार्ङ्गः। ये सीमंतजातकादीनि निप्राशानां तानि यानि वै। कर्तव्यानि न दोषोस्ति पंचान ४८
नगते गुते गुरौ। उपलक्षमेतत्॥ एवं मकरस्थेपि कार्याणि॥ क्वचिद् पूर्वतीर्थयात्रायां गुरु रूमो स्य
दिदोषाभावोदिताभिः॥ त्रिस्थलीसेतौ। गोदावर्यां गयायां च श्रीशैलग्रहणेन्दुये। सुरासुरासुरगुरूरां

चमोघदिदोषोरनविद्यते॥वसुपुराणे॥गयायांसर्वकालेषुपिंडंदद्याद्विधानतः॥अधिमासेजन्मदिने
हस्तेचगुरुशुक्रयोः॥तीर्थयात्रानकर्तव्यागयांगोदावरींविनेति॥अत्राधिमासेजन्मर्क्षेइतिपठंति।तत्र
यात्रायांजन्मनक्षत्रस्यानिषिद्धत्वात्फोदारीगयायात्रयोरपवादोयुक्तएवा।तथाग्रहणादैदिनकपीलषष्ठी
संक्रांत्युदयेनापूर्वयात्रायांकर्तव्यायांशुक्रास्तादिजनितहादोषोमास्तीत्युक्तंत्रिस्थलीसेतौ।तच्चैन।उपप्लवेत्री
तलम्नानुम्नान्वोरर्धोदयेवाकपिलाख्यषष्ठ्यां।सुरासुरेज्यास्तमयेतीर्थयात्राविधिःसंक्रमणेपिवाप्तइत्यल
मियता।अथगुर्वादित्येयद्वर्ज्यमुक्तंतद्व[illegible]गेगराववथवा।तिचारगेगुरौवर्ज्यंयदाहवात्स्यः।यात्रोत्साहम
तिष्ठान्वगरहस्त्रूडाव्रतादिकं॥वर्जयेघल्लतश्चैवजीवेच्चक्रातिचारगे।कीर्तिमंगः।प्रतिष्ठायांचैरम्नीतिस्त
याध्वनितथोवाहेमवेन्मत्युर्व्रतेदानिर्मयंगदे।कविरस्यापवादोनिहितः।राजमार्तंडः॥वक्रातिचार
गेजीवेवर्जयेव्रदनंतरं।व्रतोद्वाहादिचूडामांअष्टाविंशतिवासरान्।दिवसान्विवर्जयेत्परिणायेप्रय-

न्नेन॥ परिणय इत्युपलक्षणं। अस्याप्यपवादो दीपिकोक्तः जायाधनलाभात्तराशौ वकातिचारिणि गुरौ प्रयातः य
यदा न दा प्राह शुभं विलग्ने हितायपाणिग्रहणं वसिष्ठः॥ अत एवं लग्नप्रतिषिद्धो नौ क्षाहो वक्रिणो जीवेत
यातिचारगते गोचरबलं धानं लग्नं च पराशरः प्राह विवाहे एव कर्तव्योयमपवाद इति केचित्। ननु यज्ञोप
वीतादौ लग्नं च पराशरः प्राहेति सामान्योक्तेः विवाहे सर्वस्यापि कर्मणो यवादइत्यन्ये विशेषमाहुर्लल्लः।
य घप्प तुपन्च पस्वे जावः कन्यातिकालमावहति॥ गुणदशोपलक्षौ तथापि पाणिग्रहः कार्य इति॥ अथवे
विधुगोदित्येगुरुसहिते आदित्ये सूर्ये एकराशिगतौ गुरुस्तयो विति यावत्॥ स गुर्वादित्यस्तस्मिन्नपि
सर्वमस्तोक्तं शुभकर्म वर्ज्यं॥ यदाह शौनकः॥ एकराशिगतौ सूर्यजीवौ स्यातां यदा पुनः व्रतबंधविवाह
दि शुभकर्माखिलं व्रजेत्। यत्तु गुरुवचनं॥ गुरुक्षेत्रगतो भानुः क्षेत्रगतो गुरुः गुर्वादित्यः स विज्ञेयो गर्हितः
सर्वकर्मसु। तद्विचारमणीयं॥ तथाहि गुरुक्षेत्रे धनुर्मीनौ तत्र भानुः॥ सूर्ये गुर्वादित्यस्तदसत्। धनुर

र्कस्यादर्शिगणयणात्वादेवनिषेधः सिद्धः॥ अथगणितवशेनायस्मिन्नेवगुरूदये तेभानुस्तास्मिन्नेवरा
शौगुरुः॥ सगुर्वादित्यइति॥ तन्नसंतत्रैके कवांमताकरणेनित्यवाकताकरणस्यवैयर्थ्यपत्तेः ननुगुरो
र्बाल्यवृद्धत्वास्तमयानांपृथक्वनिषेधानर्थकः गुर्वादित्यनिषेधेनैवसि—त्वादितिचेन्मैवंबोधः राशुपादोस्त्यर्थ
:तत्राशेरेवांतेन्येदशविंशत्याशेगुरुः॥ तत्राष्टविंशतिरंशानांव्यवधानात्तावद्गुरोरस्तमावः॥ शाकालोभ्यगुरो
रेकादशातदनंतरेस्यस्तमयत्वोक्तेः सप्तदशांशांनरिक्तताच्चावार्धकमपिनास्ति॥ अतोबाल्यंवार्धकंचपरम
पक्षे॥ १५॥ मात्रेनारदादिभिः॥ उक्तंतत्रद्विजद्वयमधिकं अवशिष्यते॥ येषांतुदशावासप्तवादिनानिवाल्यं
वार्धकंचेतिपक्षस्तेषामपिसप्तावादशवादिनातिवाल्यार्धकरहितानित्र्यवशिष्यंतेतत्रगुर्वादित्यपुरुषयु
क्तोपिदोषोयथास्यादितिवचनारंभः॥ एवंबाल्येपिकृष्टमंनन्वेवंगुर्वादित्यंएवतर्हिवक्तव्योगुरोर्वाल्यवार्ध
कास्तमयानांपार्थक्येनदोषाभिधानमनर्थकमितिचेत्॥ यदायत्रराशौस्त्यर्थस्ततः॥ प्राग्राशौगुरोरुदयस्त

मु॰ही॰ ५० त्रबाल्यदोषः। काराबत्याय दोन्नरराशौगुरुस्तदा॥ वार्द्धकदोषः सावकाशः बहूनां शांतरत्वाद्दस्तमयसंभा
